पश्चात् तापः ।)

अन्वाहार्य्यं, क्ली, (प्रतिमासमाहरणीयं, अनु+आ+हृ+ण्यत् ।) मासिकश्राद्धं । इत्यमरः ॥ तत्तु प्रथमावास्याविहितं पार्व्वणश्राद्धं अकृतसपिण्डीकरणस्य वत्सरान्ते प्रतिमासं यत् श्राद्धं तदिति केचित् । इति भरतः ॥ गोभिलगृह्योक्तकर्म्माङ्गमासाद्यङ्गश्राद्धं । तदन्ताङ्गदक्षिणा च । यथा,—
"यत् श्राद्धं कर्म्मणामादौ याचान्ते दक्षिणा भवेत् । अमावास्यं द्वितीयं यदन्वाहार्य्यं विदुर्बुधाः" ।
इति गोभिलगृह्यं ॥

अन्वाहार्य्यकं क्ली,(प्रतिमासमाहरणीयं, अनु+आ+हृ+ण्यत्, ततः स्वार्थे कन् ।) अन्वाहार्य्यं । यथा,—
"पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं" ।
इति मनुः ॥

अन्वाहितं, त्रि, (अनु+आ+धा+कर्म्मणि क्त ।) यदेकस्य हस्ते निहितं द्रव्यं तेनापि पश्चादन्यस्य हस्ते स्वामिने देहीति निहितं तत् । इति मिताक्षरा ॥
("याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः" । इति याज्ञवल्क्यः,—
"एष एव विधिर्दृष्टो याचितान्वाहितादिषु" ॥ इति नारदः ।) गच्छित द्रव्य ताहार स्वामिके दिते अन्यहस्ते अर्पणकरा इति भाषा ॥

अन्वितः,त्रि, (अनु+इण्+क्त ।) युक्तः । मिलितः । इति जटाधरः ॥ ज्ञातान्वयपदादिः । यथा,—
"पदार्थान्तरैरन्वितानां सङ्केतो गृह्यते" ।
इति काव्यप्रकाशः ॥
(पदानां योग्यताकाङ्क्षादिरूपान्वयसहितः । परस्परं सम्बद्धः ।
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः" ॥
इति साहित्यदर्पणे ।)

अन्विष्टः, त्रि, (अनु+इष्+क्त ।) अन्वेषितः । कृतान्वेषणः । इत्यमरः । ("यदायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः" । इति कुमारसम्भवे ।)

अन्वीतः, त्रि, (अनु+इङ गतौ+कर्त्तरि क्तः ।) अन्वितः । युक्तः । इति जटाधरः ॥

अन्वेषणं, क्ली, (अनु+इष्+ल्युट्) अन्वेषणा । अनुसन्धानं । यथा, "सुग्रीवो राममित्रं स जनकतनयान्वेषणे प्रेषितोऽहं" । इति महानाटकम् । ("दोषान्वेषणमेव मत्सरयुषां नैसर्गिको दुर्ग्रहः" । इत्युद्भटः ।)

अन्वेषणा,स्त्री, (अनु+इष्+णिच्+भावे युच् तस्य अनः, ततः टाप् ।) तर्कादिना यथाबोधितधर्म्मादान्वेषणं । अन्वेषणमात्रं । तत्पर्य्यायः परीष्टिः २ पर्य्येषणा ३ गवेषणा ४ । इत्यमरः ॥

अन्वेषितः, त्रि, (अनु+इष्+णिच्+कर्म्मणि क्त ।) कृतान्वेषणः । तत्पर्य्यायः । गवेषितः । २ अन्विष्टः । ३ मार्गितः । ४ मृगितः । ५ इत्यमरः ॥ ६ परीष्टः । ७ पर्य्येषितः । इति अन्वेषणापर्य्याये परीष्टिपर्य्येषणापददर्शनात् ॥

अन्वेष्टा, (ऋ) त्रि, (अनु+इष्+तृच् ।) अन्वेषणकर्त्ता । तत्पर्य्यायः ॥ अनुपदः २ । इति हेमचन्द्रः ॥ ("अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति शतशो महीं" । इति नलोपाख्यानं ।)

अप, व्य, (न पाति, न+पा+ड "चादयोऽसत्त्वे" इति निपातसंज्ञया स्वरादिनिपातमव्ययमिति अव्ययम् ।) उपसर्गविशेषः । अस्यार्थः । अनादरः । भ्रंशः । असाकल्यं । वैरूप्यं । त्यागः । नञर्थः । इति दुर्गादासः ॥ अपकृष्टार्थः । वर्ज्जनार्थः । वियोगः । विपर्य्ययः । विकृतिः । चौर्य्यं । निर्देशः । हर्षः । इति मेदिनी ॥

अपः, [स्] क्ली, (आप्+असुन्, पृषोदरादित्वात् ह्रस्वः ।) यज्ञकर्म्म । इत्युणादिकोषः ।

अपकर्म्म, क्ली, (अपकृष्टं कर्म्म ।) दुष्क्रिया । मन्दकर्म्म । अपकृष्टार्थापोपसर्गेण कर्म्मशब्दस्य कर्म्मधारयसमासः ।

अपकारः, पुं, (अप+कृ+भावे घञ् ।) द्रोहः । अनुपकारः । मन्दकरणं । इति हलायुधः । (अनिष्टसाधनं । असद्व्यवहारः । अत्याचारः । द्वेषः ।
"उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" ।
इति माघः ।)

अपकारगीः, [र्] स्त्री, (अपकारेण गीः वाक्यं ।) अपकारवाक्यं । भर्त्सनं । इत्यमरः ।

अपकारी, [न्] त्रि, (अपकरोति, अप+कृ+णिनि ।) अपकारकः । द्रोहकः । यथा,—
"अपकारिणि चेत् क्रोधः क्रोधे क्रोधः कथं न ते ।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि" ॥
इत्युद्भटः । (अहितकारी । अनिष्टसाधकः । पीड़कः । दुर्वृत्तः । कुकर्म्मकारी ।
"किं भक्तेनासमर्थेन किं शक्तेनापकारिणा" ।
इति पञ्चतन्त्रम् ।)

अपकृष्टं, त्रि, (अप+कृष्+क्तः ।) जघन्यं । तत्पर्य्यायः । अधमं । २ निकृष्टं । ३ अणकं । ४ गर्ह्यं । ५ अवद्यं । ६ काण्डं । ७ कुत्सितं । ८ प्रतिकृष्टं । ९ याप्यं । १० रेपः । ११ अवमं । १२ अर्वं । १३ खेटं । १४ पापं । १५ अपशब्दं । १६ कुपूयं । १७ चेलं । १८ अर्व्वाचं । १९ । इति हेमचन्द्रः ।

अपक्रमः, पुं, (अप+क्रम+भावे घञ्, "नोदात्तोपदेशे मान्तस्येत्यादिना वृद्धिनिषेधः" ।) पलायनं । इत्यमरः ।

अपक्रिया, स्त्री, (अप्+कृ+भावे श ।) द्रोहः । अपकारः । इति हेमचन्द्रः ॥ (विपरीतप्रयोगः । "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया" । इति माघः ।)

अपक्रोशः, पुं, (अप्+क्रुश्+भावे घञ् ।) निन्दनं । जुगुप्सनं । भर्त्सनं । इति शब्दरत्नावली ।

अपक्वः, त्रि, (न पच्यते, पच्+कर्म्मणि क्तः, ततो नञ्समासः ।) पक्वभिन्नः । काँचा इति भाषा । यथा,—
"तैले विपर्य्ययं विद्यात् पक्वे चामक एव च" ।
इति वैद्यकपरिभाषा । तत्पर्य्यायः । २ असिद्धं । ३ आमं । ४ अशृतं । इति रत्नमाला । ("अपक्वे लवणं दद्यात् पक्वे दद्यात् मरीचकम्" ॥ इति आप्तवाक्ये ।)

अपगतः, त्रि, (अप+गम्+कर्त्तरि क्तः, अपयाते पलायिते च ।) मृतः । इति हेमचन्द्रः । गतः । दूरीभूतः । यथा,—"तापोनापगतस्तृषा न च कृशा धूली न धौता तनोः" इत्यादि बल्लालसेनः ।

अपगा, स्त्री, (अधोमुखेन गच्छति, अप+गम्+कर्त्तरि डः, स्त्रियां टाप् ।) आपगा । नदी । इत्यमरटीकायां भरतः । (स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा इत्यमरः ।)

अपघनः, पुं, (अपहत्य मिलित्वा वियुज्यते, अप+हन्+"अपघनोऽङ्ग"-मिति पाणिनिसूत्रेण अप् हस्थाने घ ।) अवयवः । अङ्गं । इत्यमरः । ("हृणिभिरपघनैर्घर्घरव्यक्तघोषान्" । इति सूर्य्यशतके ।)

अपघातः, पुं, अपहननं । अपकृष्टार्थापोपसर्गात् हनधातोर्भावे घञ् हस्य घः नस्य तः । अपकृष्टमृत्युफलकव्यापारः । अपहन्यते इति व्युत्पत्त्या अपपूर्व्वक हनधातोर्भावे घञ्प्रत्ययेन निष्पन्नः ॥

अपचयः, पुं, (अप+चि+भावे अच् । अपहरणं ।) क्षतिः । हानिः । तत्पर्य्यायः । अपहारः २ । इत्यमरः ॥ (पूजा सम्मानना । क्षयः । "देहस्यापचयोमतौ निविशते गाढ़ो गृहेषु ग्रहः" । इति शान्तिशतके ।)

अपचायितः, त्रि, (अप+चाय+कर्म्मणि क्तः ।) [पूजितः । इत्यमरः ।

अपचारः, पुं, (अप+चर्+भावे घञ्, अपथ्यसेवनं ।) अहिताचरणं । यथा, "योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैः" । इति माधवकरः ।
("कृतापचारोऽपि परैरनाविष्कृतविक्रियः ।
असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" ॥
इति माघः ।)

अपचितः, त्रि, (अप+चाय+पूजार्थे कर्म्मणि क्तः । अपचितश्चेति पाणिनिसूत्रेण पक्षे चायस्थाने चिभावः । अप+चि+क्तः ।) हीनः । क्षयितः । अवयवापचययुक्तः । क्षीणः । कृशः । "अपचितमपि गात्रं व्यायतत्वादलक्ष्यं" । इति शाकुन्तले ।

अपचितिः, स्त्री, (अप+चि+भावे क्तिन् ।) हानिः । व्ययः । पूजा । निष्कृतिः । इति मेदिनी । (क्षयः । ध्वंसः । सम्मानना ।
"अहं त्वपचितिं भ्रातुः पितुश्च सकलामिमां" ।
इति रामायणे ।)

अपच्छायः, त्रि, (अपगता छाया यस्मात् सः ।) देवः । उपदेवः । निष्प्रभः । अपगता छाया यस्मात् इति बहुव्रीहौ ह्रस्वः । (अपकृष्टच्छायाविशिष्टः । पिशाचादिः ।
"अशाखुरं खुरोत्सर्गमार्ज्जनीरेणुवर्ज्जनैः ।
दीपखट्वापच्छायेव त्यज्यते निर्धनोजनः" ।)

अपञ्चीकृतं, क्ली, (अपञ्चात्मकं पञ्चात्मकं कृतं, पञ्च+अभूततद्भावे च्वि कृ+क्तः, ततो नञ्समासः । सूक्ष्मभूतं । पञ्चीकृतभिन्नाकाशादिपञ्चभूतं । इति वेदान्तसारः ।